Q 1 भगवद्गीतायाः मतानुसारेण आत्यन्तिकनाशः कथं सम्भवति

अथवा

अधः प्रदत्तस्य श्लोकस्य टिप्पणीं लिखत

अथवा

अधः प्रदत्तस्य श्लोकस्य आशयं स्ववाक्यैः लिखत

ध्यायतो विषयान् पुंसः ----------- प्रणश्यति ।

ANS - मनुष्यः सहजतया विषयध्यानपरः एव। विषयान् ध्यायतः तस्य तेषु विषयेषु सङ्गः उपजायते । तस्मात् कामः जायते। कामात् अकस्मात् क्रोधोपि जायते। क्रोधात् सम्मोहः भवति यस्मात् स्मृतिविभ्रमः च जायते । स्मृतिभ्रंशात् बुद्धेः नाशः भवति । वुद्धिनाशात् आत्यन्तिकप्रणाशः अपि जायते।

Q2 योगः कथं आदर्शव्यक्तित्वविकासाय उपकारकं भवति

अथवा

योगश्चित्तवृत्तिनिरोधः - विशदयत ।

ANS - योगानुष्ठानात् इन्द्रिसंयमः सम्भवति। इन्द्रियसंयमः एव कर्मकुशलतायाः हेतुः । मनसः स्थैर्यमपि योगानुष्ठानात् समुपजायते। संयतचित्तस्य कर्मकुशलतायां जातायाम् एव व्यक्तित्वविकासः सम्भवति ।

Q3 कामपि केरलीयकलामधिकृत्य एकां टिप्पणीं रचयत।

ANS - प्रसिद्धा केरलीयकला भवति कूटियाट्टम् । संस्कृतरूपकाणाअभिन.प्रकारः भवति इदम् । भासरूपकाणि कुलशेखरस्य तपतीसंवरणं , सुभद्राधनञ्जयम् , शक्तिभद्रस्य आश्चर्यचूडामणिः च अस्यां कलायां मुख्यतया अभिनीयन्ते। 2000 वर्षेभ्यः प्राग् आरब्धेयं कला पौराणिकत्वेन , विज्ञानसम्पदा च नितरां विशिष्यते। युनेस्को इति अन्ताराष्टियसंस्थया अङ्गीकृता एव एषा कला ।

Q4 कथाप्त्रनिरूपणं कुरुत ।

अथवा

चनाद्रगुप्तमधिकृत्य / चाणक्यमधिकृत्य / अमात्यराक्षसमधिकृत्य एकां टिप्पणीं लिखत ।

ANS -

चन्द्रगुप्तः - मौर्यराजः भवति चन्द्रगुप्तः । तस्य पितरं सहोदरान् च नन्दाः व्योन जघान । तदा प्रभृति सः तान् प्रति द्वेषभावेन अवर्तत। चाणक्यस्य सहायेन सः नन्दान् हतवान् । चाणक्यस्य प्रियः शिष्यः च भवत्ययम् । शत्रुम् अमात्यराक्षसं प्रणमितुं चाणक्येन निर्दिष्टः सः विना विलम्बं तदनुष्ठिनोति । अन्ते चाणक्यनिर्देशात् अमात्यराक्षसं स्वामात्यपदे अभिषिञ्चति च । सचिवायतसिद्धिरूप नायकस्य उदाहरणमेव चन्द्रगुप्तः ।

चाणक्यः

चन्द्रगुप्तस्य मन्त्रिः भवति विष्णुगुप्तापरनामधेयो चाणक्यः । स्वस्य अवमन्तृन् नन्दान् उन्मूलयितुं सः यत्नं करोति । राज्यतन्त्रस्य पारंगतः असौ अमात्यः राजैश्वर्येषु निर्ममः भवति । अमात्यराक्षसं मन्त्रिपदे नियुज्य एव सः स्वीयां प्रतिज्ञां सफलीकरोति । चाणक्यस्यप्रतिज्ञा सफलीकरणं चन्द्रगुप्तवचनरूपे भरतवाक्ये सुस्पष्टं भवति ।

राक्षसेन समं मैत्री राज्ये चारोपिता वयम् ।
नन्दाश्चोन्मूलिताः सर्वे किं कर्तव्यमतः परम् ।।

वस्तुतः चाणक्यस्य प्रतिज्ञापूरणमेव मुद्राराक्षसनाटकस्य इतिवृत्तम्। अस्मिन्नर्थे सः एव नाटके नायकः इत्यपि वक्तुं शक्यते।

अमात्यराक्षसः

नन्दराजानां विश्वस्तः मन्त्रिः भवति अमात्यराक्षसः । नन्देषु विनष्टेषु अपि तेषां शत्रुं चन्द्रगुप्तं हन्तुं सः यतते । तदर्थं पर्वतकेन सह सख्यमकरोत्। मलयकेतोः आश्रितः च जातः । परन्तु निशितबुद्धेः चाणक्यस्य तन्त्रैः सः पराजितः अभवत्। मित्रं चन्ददासं जीवन्तमिच्छन् सः चन्द्रगुप्तस्य अमात्यपदवीमपि स्वीकरोति । अमात्यराक्षसस्य कर्मपटुतां बुद्धिकुशलतां विश्वस्ततां चाभिवीक्ष्य एव चाणक्यः तममात्यपदे नियोक्तुं चन्द्रगुप्तं निर्दिशति ।

Q शारिकायाः वृक्षस्य च मिथः सोहार्दम् अधिकृत्य एकां टिप्पणीं रचयत।

ANS- व्रज हरितमिति पाठः प्रकृतिं प्रति जीविनामार्द्रता एव अस्मान् पाठयति। प्रकृति अस्माकं माता रक्षिका च भवति। तस्याः पालनम् अस्माकं मातुः पूजेव करणीयम् । शारिका वृक्षे एव सञ्जाता । तस्य पल्लवानि एव शत्रुभ्यो शारिकामरक्षयत्। तस्याः पोषणं वृक्ष एव आसीत् । वृक्षस्य क्षतिः तस्यै सोढुमशक्यमेव । तस्याःमनसः आर्द्रता एव वृक्षस्य पुनः जीवने हेतुरभवत् । ईदृशं सौहार्दं विरलमेव।

prepared by
Sankaranarayanan.A HSST ( Sanskrit) Govt. HSS For Girls Ernakulam , kochi